मोहस्य च दशविधो महामोहः । तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः" ॥ अन्धतामिस्रः अभिनिवेशस्तस्य तथैत्यनेनाष्टादशधेत्यनुषज्यते । देवाः खल्वणिमादिकमष्टविधमैश्वर्य्यमासाद्य दश शब्दादीन् भुञ्जानाः शब्दादयोभोग्यास्तदुपायाश्चाणिमादयोऽस्माकमसुरादिभिर्मा स्म उपघानिषतेति बिभ्यति । तदिदं भयमभिनिवेशोऽन्धतामिस्रोऽष्टादशविषयित्वात् अष्टादशधेति" सां०कौ०। २ आसक्तौ च "अथानुरूपाभिनिवेशतोषिणा" कुमा० ।

**अभिनिवेशिन्** त्रि० अभि+नि+विश–णिनि स्त्रियां ङीप् । १ आग्रहवति २ अनुरागवति च ।

**अभिनिष्कारिन्** त्रि० अभि+निस्+कृ–णिनि स्त्रियां ङीप् । अभितोनिःशेषेण कारिणि "कृताकृतौ वस्त्रिनोऽभिनिष्कारिणः प्रजाम्" अथ० १०,१,३१ ।

**अभिनिष्क्रम** पु० अभि+निस्+क्रम–घञ् । आभिमुख्येन निर्गतौ ल्युट् । अभिनिष्क्रमणमप्यत्र न० । [निर्गते ।

**अभिनिष्क्रान्त** त्रि० अभि+निस्+क्रम–कर्त्तरि क्त । अभि-

**अभिनिष्टान** पु० अभि+स्तन–घञ् शब्दसंज्ञायां षत्वम् । १विसर्जनीये ।"नाम चास्मै दद्युर्घोषवदाद्यन्तस्थमभिनिष्टानान्तम्" गृह्यसूत्रम् । २ अक्षरमात्रे च शब्दमात्रे तु न षत्वम् । अभिनिस्तान इत्येव । [निर्गमे ।

**अभिनिष्पतन** न० अभि+निस्+पत–ल्युट् । आभिमुख्येन

**अभिनिष्पत्ति** स्त्री अभि+निस्+पद–क्तिन् । १ सम्पत्तौ सिद्धौ यस्य यथारूपमुचितं तथारूपेण तस्य भवने २उत्पत्तौ च ।

**अभिनिष्पन्न** त्रि०अभि+निस्–पद–क्त । १सम्पन्ने २सिद्धे च ।

**अभिनीत** त्रि० अभिनीयते स्म अभि–नी क्त। न्याय्ये, १युक्ते "अभिनीततरं वाक्यमित्युवाच युधिष्ठिरः" भा०शा०प० । २भूषिते ३अतिसंस्कृते ४पूजिते ५क्रोधने, यस्याभिनयः रूपाद्यनुकरणं चेष्टादिभिः कृतस्तस्मिन् ६ आभिमुख्येन ७प्रापिते च "मितार्थमभिनीतस्वम्" रामा० ।

**अभिनीति** स्त्री आनुकूल्यार्था युक्तिः । १ प्रियवाक्यादियुक्तयुक्तौ । "सान्त्वपूर्व्वमभिनीतिहेतुकम्" किरा० । २अभितः प्रापणे च रूपादेर्देहादिना ३ अनुकरणे च । नीतेराभिमुख्यम् अव्ययी० । ४ नीत्याभिमुख्ये अव्य० ।

**अभिनेतव्य** त्रि० अभि+नी–कर्म्मणि तव्य । देहचेष्टादिना १अनुकार्य्ये आभिमुख्येन २ प्रापणीये च । भावे तव्य । आवश्यकाभिनये न० । [त्वनुकरणकर्त्तरि नटादौ ।

**अभिनेतृ** त्रि० अभि+नी-तृच् स्त्रियां ङीप् । नाटके देहादे -

**अभिनेय** त्रि० अभि+नी–कर्म्मणि यत् । १देहादिचेष्टादिना १अनुकार्य्ये अभिमुखं २प्रापणीये च ।

**अभिन्न** त्रि०न भिन्नः । १एकरूपताप्राप्ते २अविदलिते ३अविदारिते च "भूयोभूयोरयिमिदस्य वर्द्धयन्नभिन्ने खिल्ये" ऋ० ६,२८,२ "अभिन्ने शत्रुभिरभेद्ये" भा० । "न भिन्नां कृष्णामुपदध्यात् आर्त्तिर्वा एषा या भिद्यते" इत्युपक्रम्य "नाभिन्नां परास्येदिति" शत०ब्रा० । ४अभग्ने दृढे,"अभिन्नेन चरेत्" कात्या० २६,७,४८,"अभग्नेन दृढेन" कर्क०

**अभिन्नपुट** पु० अभिन्नं न विदलितं पुटं यस्य । नवपल्लवे "दूर्व्वायवाङ्कुरप्लक्षत्वगभिन्नपुटोत्तरान्" रघुः ।

**अभिन्यास** पु० अभिन्यस्यते अन्तःस्थ जम्मा बहिष्करणेन अभि+नि–अस–करणे घञ् । ज्वरमुपक्रम्य, "श्वसन् निपतितः शेते प्रलापोपद्रवायुतः । तमभिन्यासमित्याहुर्हतौजसमथापरे" सुश्रुतोक्ते ज्वरभेदे "निद्रालं तमभिन्यासं क्षीणमेनं हतौजसमिति" सुश्रुतः ।

**अभिपत्ति** स्त्री अभि+पद–क्तिन् । निष्पत्तौ ।

**अभिपन्न** त्रि० अभि+पद–क्त । १ अपराधवति, २ आपद्गते, ३स्वीकृते, ४आभिमुख्येन गते च ।

**अभिपित्व** न० अभि+पा–भावे कित्वन् । १अभिपतने २आगमनकाले "विश्वं जगदभिपित्वे मनीषा" य०३३,२४,"अभिपित्वे अभिपतने आगमनकाले" वेददी० । ३अभिमतप्राप्तौ "क्षुदन्नमिहाभिपित्वम् करते गृणानः" ऋ० ४,१६,१, "अभिपित्वमभिमतप्राप्तिम्" भा० । ४ अभितः प्राप्तौ "तस्येदिन्द्रो अभिपित्वेषु रणति" ऋ० १,८३,६, "अभिपित्वेषु अभिप्राप्तिषु" भा० कुहाभिपित्वं करतः कुहोषतुः ऋ०१०,४०,२, "इमामेव ऋचमभिप्रेत्य "क्व स्विद्रात्रौ भवथः क्व दिवा क्वाभिप्राप्तिं कुरुथ" इति यास्केन अभिप्राप्तिपरत्वमस्य सूचितम् ।कर्म्मणि कित्वन् । ५अभिपतनीये,"नोविश्वं जगदभिपित्वे मनीषा"१,१८६,१, "अभिपित्वे अभिपतनीये" भा० ६अभिगन्तव्ये, "सूरिभिरभिपित्वे सजोषाः" ऋ० १,१८६,६, "अभिपित्वे अभिगन्तव्ये" भा० ७अभिप्राप्ते "परुष्णीमाशुमनेदभिपित्वं जगाम" ऋ० ७,१८,९, "इच्छाश्विन्मे अभिपित्व अरातयः" ऋ० ८,५,२१, अभिपित्वे अभिप्राप्ते भा० । ८आसन्नकाले "कक्षीवाँ अभिपित्वे अह्नाम्" ऋ० ०१,१२६,२ "अभिपित्वशब्दस्त्वासन्नकालवाचीति" भा० ९अभिप्राप्तकाले"अभिपित्वे मनवे शास्यः" ऋ०१,१८९,७, "अभिपित्वे अभिप्राप्तकाले" भा० ।